## आपत्यस्य च तद्धितेऽनाति। (१५१/१०८२)

आपत्ययकारस्य हलः उत्तरस्य तद्धिते[1] अनाकारादौ [2]लोपो भवति। [3]गार्ग्याणां समूहो गार्गकम्। [4]वात्सकम्। आपत्यस्य इति किम्? साङ्काश्यकः। काम्पिल्यकः[5]। तद्धितग्रहणम्[6] ईत्यनापत्यस्यापि[7] लोपार्थम्। सौमी इष्टिः। अनाति इति किम्? गार्ग्यायणः। वात्स्यायनः। हलः इत्येव, कारिकेयस्यापत्यं कारिकेयिः[8]॥

## क्यच्व्योश्च। (१५२/२११०)

क्य च्वि इत्येतयोश्च परतः आपत्ययकारस्य हल उत्तरस्य लोपो भवति। वात्सीयति। गार्गीयति। वात्सीयते। गार्गीयते। च्वौ – गार्गीभूतः। वात्सीभूतः। आपत्यस्य इत्येव, साङ्काश्यायते[9]। [10]साङ्काश्यभूतः। हलः इत्येव, कारिकेयीयति। कारिकेयीभूतः॥

## बिल्वकादिभ्यश्छस्य लुक्। (१५३/१३११)

नडादिषु बिल्वादयः पठ्यन्ते[11]। 'नडादीनां कुक् च' (४.२.९१/१३१०) इति कृतकुगागमा बिल्वकादयो भवन्ति। तेभ्यः उत्तरस्य छस्य भस्य तद्धिते परतो लुग् भवति। बिल्वा [12]यस्यां सन्ति बिल्वकीया, तस्यां भवाः बैल्वकाः। वेणुकीया–वैणुकाः। वेत्रकीया – वैत्रकाः। वेतसकीया – वैतसकाः। तृणकीया – तार्णकाः। इक्षुकीया – ऐक्षुकाः। काष्ठकीया – काष्ठकाः। कपोतकीया – कापोतकाः। 'क्रुञ्चायां ह्रस्वत्वं च' (ग. सू. ९२)। क्रुञ्चकीया – क्रौञ्चकाः। छग्रहणं किम्? छमात्रस्य लुग् यथा स्यात्, कुको निवृत्तिर्मा भूत् इति। अन्यथा हि संनियोगशिष्टानाम् अन्यतरापाये उभयोरपि अभावः (व्या. प. ४८) इति कुगपि निवर्तेत। लुग्ग्रहणं सर्वलोपो यथा स्याद्, यकारमात्रस्य मा भूत्॥

## तुरिष्ठेमेयस्सु। (१५४/२००८)

इष्ठन् [13]इमनिच् ईयसुन् इत्येतेषु परतः तृशब्दस्य लोपो भवति। [14]आसुतिं करिष्ठः। [15]विजयिष्ठः। [16]वहिष्ठः। दोहीयसी धेनुः। सर्वस्य तृशब्दस्य लोपार्थं वचनम्। अन्त्यस्य हि 'टेः' (६.४.१५५/१७८६) इत्येव [17]सिद्धः। लुग् इत्येतदत्र नानुवर्तते, तथाहि सति 'न लुमताङ्गस्य' (१.१.६३/२६३) इति [18]प्रतिषेधाद् गुणो न स्यात्। इमनिज्ग्रहणमुत्तरार्थम्। इतरौ तु 'तुश्छन्दसि' (५.३.५९/२००७) इति भवतः॥

---

1. परतः इत्यधिकम् फ. 2. यलोपः ब. क. ड. 3. गर्गाणाम् ब. फ. ह. ड. 4. नास्ति फ.
5. साङ्काश्यादिभ्यो ण्यः ततो ध्वन्वयोपधात् वुञ् इत्यधिकम् फ. 6. किम् इत्यधिकम् फ. 7. पूर्वेण इत्यधिकम्
फ. ह. 8. तद्धिते इति किम् गार्ग्ययोः इत्यधिकम् फ. ह, वात्स्ययोः इत्यधिकम् ह 9. काम्पिल्यायते इत्यधिकम्
फ. 10. साङ्काश्यीभूतः ब. ड फ, काम्पिल्यीभूतः इत्यधिकम् फ. 11. छविधानार्थं ये नडादयः ते यदा छसं-
नियोगेन कृतकुगागमाः ते इह गृह्यन्ते इत्यधिकम् ड. 12. अस्याम् फ. 13. इमन् इ. 14. असुतिम् क.
15. विजयं वरिष्ठः क. 16. सहिष्ठः फ, नास्ति इ. 17. सिद्धम् फ. ह, सिद्धेः इ. 18. प्रतिषेधः स्यात फ.

THE SANSKRIT LIBRARY FAIRFIELD, IA 52556